॥ श्री जिनाय नमः ॥

# ॥ श्रीमदनरेखाचरित्रम् ॥

(कर्त्ता—श्रीशुभशीलगणि)

—ःछपावी प्रसिद्ध करनारः—

पण्डित श्रावक हीरालाल हंसराज (जामनगरवाळा)

श्रीजैनभास्करोदय प्रिन्टिंग प्रेसमां छाप्युं—जामनगर

सने १९३२ संवत् १९८९

किमत ०-१२-०

॥ श्री जिनाय नमः ॥

॥ श्री चारित्रविजयगुरुभ्यो नमः ॥

# ॥ अथ श्रीमदनरेखाचरित्रं प्रारभ्यते ॥

( कर्ता–श्रीशुभशीलगणी ) ( द्वितीयावृत्तिः )

(छपावी प्रसिद्ध करनार—पंडित श्रावक हीरालाल हंसराज (जामनगरवाळा)



पालयंति सदा शीलं । मुक्त्यादिसुखदायकं ॥ भव्या मदनरेखाव–न्मनसा वपुषा गिरा ॥ १ ॥ तथाहि–भरतखंडभूषणे सुदर्शनाभिधे नगरे मणिरथाभिधो राजा राज्यं करोतिस्म. तस्य लघुर्भ्राता युगबाहुश्च युवराजोऽभूत्. तस्य युगबाहोः मदनरेखाभिधा शीलशालिनी प्रियाजनि. तस्या अतीव-मनोहरां रूपश्रियं विलोक्य स मणिरथो राजा मोहितः स्वचेतसीति दध्यौ, इयं मदनरेखा मया ध्रुवं प्राप्यैव, यद्यहमेतया सह भोगविलासान्न कुर्वे, तदा मम जन्म निष्फलमेव भविष्यति. अथ तदीय

भोगाविलासवांछया स राजा तां लोभयितुं दास्या हस्तेन वर्यपुष्पतांबूलवस्त्रालंकारादीनि वस्तुनि तस्यै नित्यं प्रेषयामास. सा निर्मलहृदया मदनरेखा तु नूनमयं ज्येष्ठप्रेषितो महाप्रसाद इति मत्वा तानि वस्तून्यंगीचकार. एवं वस्तूनामंगीकारतः स कामातुरो मणिरथनृपो निजचेतस्येवं मन्यतेस्म, यत्सा मदनरेखा नूनं मया सह भोगविलासान् कर्तुं वांछति, अतो मदीयाभिलाषोऽपि संपूर्णो भविष्यति. इति विचिंत्य तेने दुष्टेनैकदा निजदासीं प्रेष्य मदनरेखाया निजाऽनुचित्तेच्छा ज्ञापिता, सा दासी तत्र गत्वा तां मदनरेखां प्रति प्राह–भद्रे त्वदीयरूपाद्या–सक्तो मणिरथो नृपः ॥ त्वां च भोगविलासार्थं । मन्मुखेन प्रजल्पति ॥ १ ॥ एवं विधं तस्या दास्या वचः श्रुत्वा वज्राहतेव सा मदनरेखा तामुवाच, भो दासि ! त्वया स मज्ज्येष्ठो मदीयवचसैवं वाच्यः, यत्तव कुलीनस्यैतत्कार्यं कर्तुं न शोभते, त्वं तु मदीयज्येष्ठः पितातुल्योऽसि, किं च मादृशाः कुलीना वध्वः प्राणांतेऽपि वेश्योचितं कार्यं न कुर्वंति. जगति या कापि स्त्री निजशीलभंगं करोति, सा नूनं नरकगामिन्येव भवति. किंच–अणंताओ कम्मरासीओ । जया उदयमागया ॥ तया इत्थीत्तणं पत्तं । सम्मं जाणेह गोयमा

॥ १ ॥ किंच तस्य राज्ञोंतःपुरे मनोहरा राज्यो विद्यंते, तासु सत्स्वपि स मूढ इव कथमन्यां स्त्रियं वांछति? एवंविधमनोरथेन स नूनं नरकगामी भविष्यति. किंच मम भर्तरि जीवति यः कोऽपि मां भोक्तुमिच्छति, स नूनं यमातिथिरेव भविष्यति. यदिवा केनचित्कूटोपायेन स कदाचित् मह्यं बलात्कारं करिष्यति, तदाहं मदियशरीरार्पणस्थाने तस्मै मम प्राणानेव दास्ये. उत्तमाश्चेहामुत्र विरुद्धं नाचरंति. यतः—जीवघातादलीकोक्तात् । परद्रव्यापहारतः ॥ परस्त्रीकामनेनापि । व्रजंति नरकं न के ॥ १ ॥ परस्त्रीग्रहणे वांछा । न कार्या भूभुजा क्वचित् ॥ यतो भूपानुगा लोका । भवंति जगतीतले ॥ २ ॥ एवं विधानि तस्या वचनानि निशम्य विलक्षीभूता सा दासी ततः पश्चान्निवृत्य भूपोपांते गत्वा मदनरेखोक्तं सकलं वृत्तांतं कथयामास. तत् श्रुत्वा स कामातुरो नृपो विशेषतस्तां मदनरेखां भोक्तुं दध्यौ, नूनं युगबाहौ जीवति मामियं नांगीकरिष्यति, ततः केनाप्युपायेन प्रथमं तं सुबाहुमेव हन्मि, पश्चान्निराधारा सा सुखेनैव मां स्वीकरिष्यति. इति ध्यात्वा स दुष्टो निजं लघुं भ्रातरं हंतुमवसरं विलोकयति. इतोऽन्यदा तया मदनरेखया निशाशेषे स्वप्नमध्ये संपूर्णेंदुर्दृष्टः, ततस्तया स स्वप्नवृत्तांतो

निजस्वामिने युगबाहवे निवेदितः. तदा स प्राह, हे प्रिये ! मनुष्येषु चंद्र इव सौम्यवान् शांतगुणोपेतस्ते तनयो भविष्यति. क्रमादथ तृतीये मासि तस्या मदनरेखाया इति दोहदः समुत्पन्नः, यथाहं जिनेंद्राणां पूजां करोमि, गुरून् प्रतिलाभयामि, धर्मकथां शृणोमि, अन्यं च श्रावयामि, यतः—यादृशो जायते गर्भे । जीवः शुभोऽथवाऽशुभः ॥ तादृशो मातुरेव स्या—न्मनोरथः स्वमानसे ॥ १ ॥ अथान्येद्युः स युगबाहुर्वसंतसमये सप्रियः क्रीडार्थं नगराद्बहिरुद्याने ययौ. तत्र जलक्रीडादि कृत्वा स युगबाहुर्निशायां स्मृतपंचनमस्कारः कदलीगृहे सुप्तः. इतः स मणिरथो राजा निजभ्रातरं स्वल्पपरिवारयुतं रात्रावुद्याने स्थितं विज्ञाय, तं हंतुं स्वयमेकाकी खड्गहस्तोऽत्र समाययौ. मद्भ्रातुरेकाकिनोऽत्र वने रात्रौ स्थातुं न युक्तमिति मायया प्राहरिकं वदन् स तत्र कदलीगृहमध्ये प्रविष्टः. अथ युगबाहुरकस्मात् समागतं तं निजज्येष्टभ्रातरं दृष्ट्वा समुत्थाय विनयपूर्वकं नतिपूर्वकं नमस्कारमकरोत्. तदैव स दुष्टो मणिरथः स्वकल्पितां वार्तां कुर्वन् खड्गमाकृष्य विश्वस्तं तं निजसहोदरं हतवान्. तत्कालं मदनरेखया पूत्कारे कृते युगबाहुसुभटो यावत्तं हंतुमाययौ, तावत्खड्गघातविधुरीभूतोऽपि युगबाहु-

स्तान् सुभटान् प्राह, भो सुभटाः! ममायं सहोदरो भवद्भिर्न हंतव्यः, अस्मिन् विषये मम भ्रातुर्न दूषणं, मदीयं पुराकृतं दुष्कर्मैव प्रकटीभूतं. एवं तैः सुभटैर्मुक्तः स मणिरथो राजा निजवांछितं कार्यं सिद्धं मन्यमानो हृष्टो द्रुतं ततः पलाय्य स्वगृहे समाययौ, तत्र चाकस्मात्तदैव सर्पेण दष्टः स पंचत्वं प्राप, यतः—अत्युग्रपुण्यपापाना–मिहैव फलमाप्यते ॥ त्रिभिर्मासैस्त्रिभिः पक्षै–स्त्रीभिर्यामैस्त्रिभिर्दिनैः ॥ १ ॥ अथ चंद्रयशाख्यो युगबाहुपुत्रो निजजनकव्रणचिकित्सार्थं वैद्यमाकारयितुं नगरमध्ये ययौ. इतोंतकालनिःश्वासान् गृह्णंतं तं निजपतिं मदनरेखा जगौ, हे स्वामिन्! अथाधुना भवद्भिर्मनागपि खेदो न कर्तव्यः, जीवाः स्वकृतकर्मणामेव फलानि प्राप्नुवंति, यतः—यद्येन विहितं कर्म । भवेऽन्यस्मिन्निहापि वा ॥ वेदितव्यं हि तत्तेन । निमित्तं ह्यपरो भवेत् ॥ १ ॥ गृहाण धर्मपाथेयं । कायेन मनसा गिरा ॥ यत्कृतं दुष्कृतं किंचित् । सर्वं गर्हस्व संप्रति ॥ २ ॥ शत्रौ मित्रे सुते पत्न्यां । मणौ दृषदि सर्वथा मोहः सद्भिर्न कर्तव्यो–ऽनंतसंसारदायकः ॥ ३ ॥ ततो मदनरेखया स्मारितो युगबाहुः समग्रजीवक्षमायाचनपूर्वकमाराधनां चकार, तथाहि—यच्च मित्रममित्रं मे । स्वजनोऽरिजनोऽपि

वा ॥ ते सर्वे क्षमयंतु मे । क्षमाम्यहमपीह तान् ॥१ ॥ तिर्यक्त्वे सति तिर्यंचो । नरकेऽपि च नारकाः ॥ अमरा अमरत्वे च मनुष्यत्वे च मानुषाः ॥ २ ॥ ये मया स्थापिता दुःखे । सर्वांस्तान् क्षमयाम्यहं ॥ क्षमंतु मम तेऽपीह । मैत्रीभावमुपागताः ॥ ३ ॥ जीवितं यौवनं लक्ष्मी । रूपं प्रियसमागमः ॥ चलं सर्वमिदं वात्या । नर्तिताब्धितरंगवत् ॥ ४ ॥ व्याधिजन्मजरामृत्यु–ग्रस्तानां प्राणिनामिह ॥ विना जिनोदितं धर्मं । शरणं कोऽपि नापरः ॥ ५ ॥ सर्वेऽपि जीवाः स्वजना । जाताः परजानाश्च ते ॥ प्रतिबंधं न कुर्वेऽपि । तेषु केष्वपि मोहतः ॥ ६ ॥ एक उत्पद्यते जंतु—रेक एव विपद्यते ॥ सुखान्यनुभवत्येको । दुःखान्यपि स एव हि ॥ ७ ॥ न सा जाइ न सा जोणी । न तं ठाणं न तं कुलं ॥ न जाया न मुआ जत्थ । सव्वे जीवा अणंतसो ॥ ८ ॥ एगोहं नत्थि मे कोइ । नाहमन्नस्स कस्सवि ॥ एवमदीणमणसा । अप्पाणमणुसासए ॥ ९ ॥ इत्याद्यनित्यभावानां भावयन्, मदनरेखयापि च प्रोत्साहितः स युगबाहुः शुभध्यानपरायणो विपद्य ब्रह्मदेवलोके देवोऽभूत्. अथ वैद्ययुतस्तत्रागतश्चंद्रयशा निजतातं युगबाहुं मृतं विलोक्य भृशं रुरोद. मदनरेखापि चिरं विलापं विधायेति

दध्यौ, धिगस्तु मां, याऽहं पत्युर्मरणहेतुरभवं. अथ मम भर्ता तु मृतः, स्त्रियाश्च भर्तैव शरणं. किंच प्रातः स दुष्टो मणिरथो यदि मां गृहीष्यति, तदा को मे रक्षणं करिष्यति? अथ स्वर्गापवर्गसुखदं शीलं तु मया केनाप्युपायेन रक्षितव्यमेव. इति ध्यात्वा सा मदनरेखा ततः प्रच्छन्नं वनमध्ये निर्ययौ. एवं गच्छंती सा मदनरेखा द्वितीयदिने प्रभाते महाटव्यां प्राप्ता, तत्र कस्मिंश्चिज्जलाशये स्नानं विधाय पयः पीत्वा क्वापि कदलीगृहे सुप्ता. एवं तत्र स्थिता फलाहारपरा सा सप्तमे दिने पुत्रमसूत. ततः सा प्रभते तस्य बालस्य करांगुल्यां युगबाहुनामांकितां मुद्रां प्रक्षिप्य. तं च रत्नकंबलेन वेष्टयित्वा, वृक्षच्छायायां मुक्त्वा स्ववस्त्राणि क्षालयितुं निकटस्थे सरसि गता. तत्र पयोमध्ये प्रविष्टा सा मदनरेखा जलहस्तिना शुंडया गृहीत्वा व्योम्न्युल्लालिता. तदानीमेव नंदीश्वरतीर्थयात्रार्थं प्रस्थितेनैकेन खेचरेण नभसः पतंती सा जगृहे. तद्रूपमोहितः स खेचरस्तां वैताढ्ये निनाय. अथ तत्र विलापं कुर्वती सा खेचरेण तत्कारणं पृष्टा सर्वं निजवृत्तांतं जगौ. भो खेचर! यत्र स्थानादहं त्वयात्रानीता, तत्र मकः पुत्रः प्रसूतोऽभूत्, तं पुत्रं च कदलीगृहे मुक्त्वाहं वस्त्रप्रक्षालनार्थं यावत्स-

रसि प्रविष्टा, तावज्जलहस्तिना गगनतले उल्लालिता, इतस्त्वयाकाशादेवाहं गृहीता. अथ स बालो मां विना तत्रैकाकी स्थितो मृत्युं यास्यति, अतो मयित्वं प्रसादं विधाय तत्र नय? अथवा तं बालमत्रानय? तत् श्रुत्वा स खगः प्राह, भो सुंदरि! यदि त्वं मां निजभर्तृत्वेनांगीकरोषि, तदाहं तव किंकरो भवामि. इति श्रुत्वा तया मदनरेखया ध्यातं, अथास्मिन्नवसरे मया विलंबंविना शीलं पालयितुं नैव शक्यते, इति ध्यात्वा मदनरेखा जगौ प्रथमं त्वं मे तं पुत्रमत्र समानय? तदा स खगोऽवदत्, हे सुंदरि! अहं वैताढ्यपर्वतस्थरत्नावहपुरेशस्य मणिचूड विद्याधरस्य मणिप्रभाभिधः पुत्रोऽस्मि. वैराग्यवासितहृदयो मम स पिता मां राज्येऽभिषिच्य चारणर्षिसंनिधौ संयममग्रहीत्. स मम पिता विहरन्नत्रागत्यातीतवासरे नंदीश्वरद्वीपे देवान्नंतुं गतोऽस्ति. तमनुगम्य पश्चादागच्छता मया त्वं दृष्टा, गृहीता च. अथ त्वं मां निजपतित्वेन स्वीकृत्य सर्वखेचरीणां स्वामिनो भव? किंच प्रज्ञप्तिविद्यया मया तव पुत्रस्यापि वृत्तांतो ज्ञातोऽस्ति, मिथिलापुरपतिना तुरगापहृतेन पद्मरथभूपेन स तव पुत्रो वने दृष्टः, स्वपुरे समानीय च निजप्रियायाः पुष्पमालायाः समर्पितोऽस्ति, सा च तमधुना स्वपुत्रवत्

पालयति. ततस्त्वं प्रसन्नीभूय मदीयां प्रार्थनां स्वीकुरु? तत् श्रुत्वा तया ध्यातमरेरे! ममैवं प्रतिकूलकर्मसमागमो जातः, मयैवं व्यसनपरंपरैववानुभूयते, अथैवं महासंकटे पतिताहं कथं निजशीलरक्षणं करिष्ये? कामपीडितोऽयं खेचरः किमपि कृत्याकृत्यं न ज्ञास्यति. इदानीं तु मया केनापि च्छलेन कालविलंब एव करणीयः. इति विचिंत्य सा तं जगाद, भो खेचराधीश! प्रथमं त्वं मा नंदीश्वरद्वीपं नय? तत्र देवान्नत्वा पश्चादहं त्वदुक्तं करिष्ये. इति श्रुत्वा तुष्टेन तेन खगेन सा क्षणान्नंदीश्वरद्वीपं नीता, तत्र च सैवं शाश्वतानि जिनचैत्यानि वंदतेस्म, यथा—चत्वारोंचनशैलेषु । दधिमुखेषु षोडश ॥ द्वात्रिंशच्च रतिकरा—भिधानेषु जिनालयाः ॥ १ ॥ योजनानां शतं दीर्घाः । पंचाशद्विस्तृताश्च ते ॥ द्विसप्तत्युच्छ्रिताः सर्वे । द्विपंचाशद्भवंत्यमी ॥ २ ॥ एवं तत्र ऋषभचंद्राननवारिषेणवर्धमानाभिधान् शाश्वतजिनान्नत्वा सा मदनरेखा तेन खेचरेण सह तत्र स्थितं मणिचूडमुनीश्वरं नमस्कृत्य यथोचितस्थाने विद्याधरसभायां धर्मोपदेशं श्रोतुं समुपविष्टा. तदा स ज्ञानवान् मणिचूडमुनीश्वरोऽपि निजपुत्रहृदयविचारं विज्ञाय तदुचितां देशनां ददौ, यथा भो भो भव्यलोकाः! कुमार्गः

सर्वथापि न सेव्यः परस्त्रीगमनादिकुमार्गसेवया नूनं नराणां श्वभ्रपात एव भवति, यतः–परस्त्रीगतिवांछातः । पुरुषो नरकं व्रजेत् ॥ अन्यनृसेवया नारी । गामिनी नरके भवेत् ॥ १ ॥ दाराः परभवकाराः । बंधुजनो बंधनं विषं विषयाः ॥ कोऽयं जनस्य मोहो । ये रिपवस्तेषु सुहृदाशाः ॥ २ ॥ पुत्रो मे भ्राता मे । स्वजनो मे गृहकलत्रवर्गो मे ॥ इति कृतमेमेशब्दं । पशुमिव मृत्युर्जनं हरति ॥ ३ ॥ कोऽहं कस्मिन् कथमायातः । को मे जननी को मे तातः ॥ इति परिभावयतः संसारः । सर्वोऽयं खलु स्वप्नविचारः ॥ ४ ओतुः पयः पश्यति नैव दंडं । कीरोऽपि शालोन्न च लोष्टुखंडं ॥ काकः पलं नो चलसिंहतुंडं । जंतुस्तथा शं न यमं प्रचंडं ॥ ५ ॥ एवंविधं निजजनकमुनेरुपदेशमाकर्ण्य मणिप्रभ उत्थाय तां मदनरेखां राज्ञीं क्षमयित्वा वदत्, भो सुंदरि! अद्यप्रभृति त्वं मम जामिरसि, अथ तुभ्यं किमुपकारं करोमि? तया प्रोक्तं भो बांधव! तीर्थवंदनं कारयता त्वया मह्यमतुल्य उपकारः कृतोऽस्ति, अथ त्वं मम परमबांधवोऽसि. ततस्तया स्वपुत्रस्वरूपं पृष्टः स मुनिः प्राह, प्राक् द्वौ राजपुत्रावभूतां, मिथश्च तौ परमप्रीतिभाजावास्तां. क्रमात्तौ द्वावपि पुण्यविशेषान्मृत्वा सु-

रौ जातौ, तयोर्मध्यादेकः स्वर्गाच्च्युतः पद्मरथाभिधो राजा भूत्, द्वितीयश्च ते सुतोऽजनि. अथ वनमध्येऽश्वापहृतेन तेन पद्मरथनृपेण स तवांगजो गृहीतः, स्वपत्न्याः पुष्पमालायाश्च समर्पितः पूर्वभवस्नेहात्तस्य तव सूनोः स पद्मरथनृपो जन्मोत्सवादि कारयामास, अतस्तव सुतस्तत्र सुखेन वर्धमानोऽस्ति. अथैवं तस्मिन् मुनौ जल्पति, तत्राकस्माज्जितसूर्यशशिप्रभं, रत्नौघनिर्मितं, क्वणत्किंकिणीगणालंकृतं विमानमेकं गगनांगणादवतीर्णं. ततो विमानान्निजशरीरकांत्या प्रकाशितदिग्मंडलश्चलत्कुंडलाद्यनेकाभूषणभूषितांगो गंधर्वदेवैर्गीयमानगुणः कश्चिद्देवः समुत्तीर्य प्रथमं तस्या मदनरेखायाः प्रदक्षिणां दत्वा तस्या एव पदयोः प्रणनाम, पश्चात् स सुरस्तं मुनिं वंदतेस्म, ततश्च स सुरो मुनेरग्रे धर्मं श्रोतुं समुपविष्टः. अथैवं तस्य सुरस्य विपरीतवंदनं निरीक्ष्य खगाधिपः स मणिप्रभस्तं सुरं नत्वा प्राह, भो देव! युष्मादृशा देवा अपि यदा नीतिमार्गमुल्लंघयंति, तदास्मादृशां मनुष्याणां किं दूषणं? त्वयैनं चतुर्ज्ञानधरं चारणमुनिं मुक्त्वा प्रथमं कथमियं मानुषीमात्रा नमस्कृता? तत् श्रुत्वा स सुरो यावत्किंचिद्वदति, तावत्स मुनिरेवाचष्टे, भो खेचर! त्वमेवं मा ब्रूहि? नैवायं सुरस्तथा-

विधं तवोपालंभमर्हति. त्वमस्य देवस्य वंदनहेतुं शृणु? यदास्या मदनरेखाया भर्ता युगबाहुः, अस्यामेवासक्तमानसेन ज्येष्टभ्रात्रा मणिरथेन खड्गप्रहारेण हतस्तदा तत्प्रांतसमयेऽनया स्त्रिया स स्वभर्ता मधुरैर्वचनैस्तथाराधनया निर्यामितो यथा जैनेंद्रं ध्यानं ध्यायन् स युगबाहुः पंचत्वं प्राप्य पंचमे कल्पे इंद्रसामानिकः सुरोऽभूत्. तत्र च स देवोऽवधिज्ञानेनेमां मदनरेखां स्वधर्मदात्रीं गुर्विणीं मन्वानोऽत्रागस्य प्रथममिमामनमत्. एवं धर्मदायिन्या अस्याः कोटिशः प्रणामैरप्ययं देवो नानृणो भवेत् यतः—यो येन स्थाप्यते धर्मे। यतिना गृहिणापि वा ॥ स एव तस्य सध्धर्म-दाता धर्मगुरुर्भवेत् ॥ १ ॥ किंच—सम्यक्त्वं ददता दत्तं। शिवसौख्यं सनातनं ॥ एतद्दानोपकारस्यो-पकारः कोऽपि नो समः ॥ २ ॥ सम्मत्तदायगाणं। दुप्पडियारं भवेसु बहुएसु ॥ सव्वगुणमेलियाहिं य। उवयारस्स कोडीहिं ॥ ३ ॥ इत्यादिं मुनिना प्रोक्तं। जिनधर्मं सुभावयन् ॥ सामर्थ्यप्रबलं विद्या-धरः क्षमयते सुरं ॥ ४ ॥ ततः स सुरस्तां मदनरेखा राज्ञींप्रत्यवदत्, भो उपकारिणि! सुलोचने अथ किं तेऽभीष्टं ददामि? तदा सा जगौ, भो देव! तत्त्वतो यूयं ममाभीष्टं कर्तुं न क्षमाः, यतः सर्वेऽपि

गीर्वाणाः सदा ह्यविरता भवंति. किंच जन्मजरामृत्युरोगशोकार्तिवर्जितं निरुपाधिकं ध्रुवसौख्योपेतं मोक्षमेवाहमभिलषामि. तथापि भो सुरोत्तम! त्वं मां शीघ्रं मिथिलायां पुरि नयस्व? यथा तत्र पुत्रमुखं प्रेक्ष्य पश्चात्संयमं लास्यामि. ततस्तेन सुरेण सा मिथिलायां नीता. तत्र नगर्यां श्रीमल्लिनाथस्य जमन्दीक्षाकेवलज्ञानाख्यानि कल्याणकानि जातानि संति. तत्र प्रथमं तौ द्वावपि जिनप्रासादेषु जिनबिंबानि नमतः स्म. ततस्तौ साध्वीनामुपाश्रये गत्वा ताः प्रणेमतुः. तदा प्रवर्तिन्या सध्व्या तयोर्धर्मोपदेशो दत्तो यथा—इदं मनुष्यजन्म लब्ध्वा जनैः क्षणमपि प्रमादो न विधेयः, यतः—पुरुषः कुरुते पापं। बंधुनिमित्तं वपुर्निमित्तं च ॥ वेदयते तत्सर्वं। नरकादौ पुनरसावेकः ॥ १ ॥ यत्नेन पापानि समाचरंति। प्रसंगादपि नाचरंति ॥ आश्चर्यमेतद्धि मनुष्यलोके। क्षीरं परित्यज्य विषं पिबंति ॥ २ ॥ इत्यादिधर्मोपदेशांते स सुरो मदनरेखांप्रति प्राह, भो सुलोचने! एहि? अथावां राजकुले यावः, तत्र च तवांगजं दर्शयामि. तदा मदनरेखावदत्, भो देव! अथ भवभ्रमणहेतुना पुत्रस्नेहेन सृतं, यतो गुरूणां पार्श्वे मया संसारस्य सर्वाप्यसारता श्रुतास्ति, यतः—संसारे

भ्रमतां प्राण–भाजां पतिसुतादयः ॥ संबंधा भूरिशो भूता । भविष्यंति भवंति च ॥ १ ॥ मयैष तनयो जातो–ऽनंतशो भवभ्रांतितः ॥ जनिताहं तथानंत–वारांश्चानेन भूतले ॥ २ ॥ अथैतासां साध्वीनां चरणा एव मम शरणं, इत्युक्त्वा मदनरेखा विसृष्टः स सुरो देवलोकं ययौ. ततः सा तासां साध्वीनां पार्श्वे दीक्षां गृहीत्वा संजातसुव्रताह्वा नानाविधतपांसि तनुतेतरां. इतस्तस्य भूपस्य गृहे तस्य बालस्यागमनप्रभावेण सर्वेऽपि रिपवस्तं भूपं समागत्य नताः, ततस्तेन पद्मरथभूपेन तस्य नमिरिति नाम चक्रे. अथ धात्रीभिः पाल्यमानः स नमिकुमारः क्रमात् प्राप्तयौवन उपाध्यायांतिके धर्मशास्त्रकलाभ्यासं चकार. ततो राज्ञा क्रमाद्राजकुलजाताभिः, स्वरूपपराभूतामरीभिरष्टोत्तरसहस्रकन्याभिः सह तस्य विवाहो विहितः. ततो राजा तं राज्ययोग्यं ज्ञात्वा राज्येन्यस्य श्रीज्ञानसागरसूरिपार्श्वे प्रव्रज्यां जग्राह, तीव्रं तपश्च तप्त्वा लब्धकेवलज्ञानः स पद्मरथो राजा शिवं ययौ. अथ नतानेकक्ष्मापालमौलिः स नमिराजा राज्यं कुर्वाणः शक्रसमो रराज. इतश्च यस्यां रात्रौ स मणिरथनृपो निजं लघुभ्रातरं युगबाहुं जघान, तस्यामेव निशि सर्पदष्टः स मृत्वा चतुर्थ्यां नरकावनौ गतः. ततः

सचिवादिभिर्मिलित्वा द्वयोरपि तयोः सोदरयोरेकस्मिन्नेव स्थानेऽग्निसंस्कारं कृत्वा युगबाहुसुतश्चंद्रयशा राज्येऽभिषिक्तः. अथ तस्य नमिभूपतेर्मेदिनीं पालयतोऽन्येद्युः प्रधानः श्वेतहस्ती आलानस्तंभमुन्मूल्य विंध्याटवींप्रत्यचालीत्. क्रीडार्थमरण्ये गतेन चंद्रयशसा नृपेण स गजो दृष्टः, तदैरावतगजसहोदरं तं गजं निजाधोरणैर्बलाद् बध्ध्वा स स्वपुरमानयामास. चरपुरुषैस्तं वृत्तांतं ज्ञात्वा नमिराजा तं गजमानयितुं चंद्रयशोनृपपार्श्वे निजं दूतं प्राहिणोत्. दूतोऽपि तत्र गत्वा चंद्रयशोभूपं प्राह, मिथिलास्वामी नमिराजात्र समागतं स्वं गजं याचते. तत् श्रुत्वा चंद्रयशा जगौ, यद्येवं स्वयमिहागतं निजं गजं तव स्वमी मह्यं याचते, तर्हि नूनं स नीतिशास्त्राऽज्ञातो दृश्यते, यतः—न श्रीः कुलक्रमायाता । शासने लिखितापि वा ॥ खड्गेनाक्रम्य भुंजीत । वीरभोज्या वसुंधरा ॥ १ ॥ तत् श्रुत्वा स दूतोऽवदत्, यदि त्वया गजो नार्पयिष्यते, तदा मम स्वामी संग्रामे त्वां हत्वा निजं गजं गृहीष्यति. ततो रुष्टो नृपस्तं दूतं सभातो बहिर्निष्कासयामास. अथ स दूतोऽपि नमिनृपस्य पार्श्वे गत्वा सर्वं वृत्तातं व्यजिज्ञपत्. ततः कुपितः स नमिभूपोऽपि निजसर्वसैन्ययुतो भेरीभांकारैर्दिगंतराणि गर्जयन्

सुदर्शनपुरंप्रति चचाल. एवं तं नमिनृपं भूरिसैन्ययुतमागच्छंतमाकर्ण्य यावच्चंद्रयशा नृपो युद्धाय तत्सन्मुखं यातुमैच्छत्, तावत् शकुनैर्निषिद्धो मंत्रिभिरिति विज्ञप्तश्च, हे स्वामिन्! अधुनास्माभिर्बहिर्निर्गत्य युद्धं कर्तुं न युज्यते, अतो गोपुराणि पिधाय मध्यस्थैरेवास्माभिर्युद्धं कर्तव्यं. ततो वैरिबलं परीक्ष्य पश्चाद्बहिर्निःसृत्य युद्धं करिष्यामः. एवं मंत्रिभिरुक्तः स राजा तदुक्तं चकार. यतः—चित्तज्ञः शीलसंपन्नो। वाग्मी दक्षः प्रियंवदः ॥ समयज्ञश्च स्मृतिमान्। मंत्री स्यात्सप्तभिर्गुणैः ॥ १ ॥ अथ स नमिराजापि महता निजसैन्येन परितस्तन्नगरं वेष्टयामास. अथ तयोर्द्वयोर्भूपयोर्मिथो महायुद्धे जायमाने जीवसंहारं विज्ञाय द्वयोः सहोदरयोश्च कलिं वीक्ष्य तया सुव्रतार्यया ध्यातं, अरेरे! एनमसारं संसारं धिगस्तु, यत एतौ द्वावपि भ्रातरावज्ञानाद्युद्धं कुर्वाणौ नरकगामिनौ भविष्यतः, इति ध्यात्वा सा सुव्रतार्या गणिनीं समापृच्छ्य तयोः प्रतिबोधार्थं साध्वीपरिवारयुता चचाल. प्रथमं सा नमिनृपपार्श्वे समागमत्, तदा नमिनृपेणाभ्युत्थानपूर्वकं साध्वी वंदिता, ततः साध्वी तस्मै धर्मोपदेशं ददौ, यथा—चत्तारि परमंगाणि। दुल्लहाणीह जंतुणो ॥ माणुसत्तं सुए सद्धा। संजमं

मीयवीरियं ॥ १ ॥ ततः सा साध्वी रहसि नमेरग्रे इदमब्रवीत्–राजन्नस्मिन् भवे दुःख–दायके राज्यतः खलु ॥ गच्छति नरके घोरे । जीवोऽत्राणो न संशयः ॥ १ ॥ ज्येष्ठभ्रात्रा समं युद्धं । कर्तुं न युज्यते तव ॥ नमिः प्राह कथं ज्येष्ठ–भ्रातायं विद्यते मम ॥ २ ॥ ततः साध्व्याऽनेन चंद्रयशसा सह तस्य सहोदरभवनसंबंधः प्रोक्तः, ततः प्रत्ययार्थं राज्ञा पुष्पमाला पृष्टा, हे मातः ! अहं कस्याः पुत्रः? तदा पुष्पमालया प्रोक्तं, नूनं त्वमस्या मदनरेखाया एव पुत्रोऽसि, इत्युक्त्वा तया तस्मै मुद्रायुक्तं कंबलं दर्शितं. एवं निजजनन्या साध्व्या निवारितोऽपि स नमिनृपोऽभिमानाभिभूतो युद्धान्न विरराम. ततः सा साध्वी चंद्रयशसः पार्श्वे गत्वा तस्मै धर्मोपदेशं ददौ. तदा चंद्रयशा जगौ, भो महासति ! एवंविधे युद्धे जायमाने त्वमत्र किमर्थमागाः? तदा साध्व्या स्वकीयद्वितीयपुत्रोत्पत्तिसंबंधस्तस्मै निवेदितः. ततो राजा जगौ, हे मातः ! सांप्रतं स मे भ्राता कुत्रास्ति? साध्व्या प्रोक्तं, येनाधुना तव पुरं सैन्येन वेष्टितमस्ति, स एव तव भ्रातास्ति. तत् श्रुत्वोत्सुकश्चंद्रयशा युद्धं मुक्त्वा निजभ्रातुर्मिलनाय चचाल. एवं निजं भ्रातरमागच्छंतं श्रुत्वा स नमिनृपोऽपि मानं मुक्त्वा सन्मुखमुपेत्य ज्येष्ठ भ्रातुः पादयोः

प्रणनाम ज्येष्ठभ्रातापि तमुत्थाप्य सस्वजे. ततस्ताभ्यां द्वाभ्यां भ्रातृभ्यां मिलित्वा सस्नेहं सा साध्वी वंदिता. ततश्चंद्रयशा नृपो नमिंप्रति जगौ, हे भ्रातः! पितुर्मरणादनुराज्यभारधरणपुत्राऽभावादियत्कालं मया राज्यं कृतं, त्वं तु भ्राता मयेयत्कालं न ज्ञातः. अधुनैवानया साध्व्या मात्रा त्वं मम भ्रातेति ज्ञापितः, अतः परं च मम राज्येन कार्यं नास्ति, अहं त्वग्रेऽपि राज्यं त्यक्तुकाम आसं, तव च राज्यभारधारणे योग्यतास्ति. तत् श्रुत्वा नमिरप्याह, हे भ्रातः! मह्यमपि राज्यं न रोचते, अतोऽहमपि संयमग्रहणमिच्छामि. चंद्रयशाः प्राह, यदि ज्येष्ठभ्राता लघुभ्रात्रे राज्यं दत्वा दीक्षां गृह्णाति, तदैव युक्तमुच्यते, एवं निजलघुभ्रातरं नमिं पर्यवसाप्य स चंद्रयशा नृपो महोत्सवपूर्वकं व्रतं जग्राह. अथ स प्रतापी नमिराजा न्यायेन रज्यं करोतिस्म. एवं षण्मासानंतरमेकदा तस्य नमिनृपस्य दाहज्वरे जायमाने वैद्याश्चिकित्सां चक्रुः, परं तस्य मनागपि गुणो नाभवत्. तदा नृपस्य दाहज्वरशांतये सर्वा राज्ञ्यो मिलित्वा चंदनं घर्षयामासुः. तदा तासां बाहुवलयझणत्कारश्रवणतो नमेर्नृपस्य वेदना प्रत्युत वृद्धिं प्राप्ता. तदा राज्ञा पृष्टं, कोऽयं दारुणो रवः श्रूयते? तदा सेवकैस्तस्य

चंदनघर्षणस्वरूपं प्रोक्तं. राज्ञादिष्टमेतासां पंचशतप्रियाणां हस्तेभ्य एकैकं वलयमुत्तारयत? तत एकैकस्मिन् वलये उत्तारिते राज्ञो मनाक् सुखं बभूव. एवं क्रमात् सर्वेषु वलयेषूत्तारितेषु राजा विशेषं सुखमन्वभवत्, एवं ताभिरेकैकमेव वलयं मंगलार्थमेव निजहस्तेषु स्थापितं. तदा राज्ञा पृष्टं, किमधुना राज्यश्चंदनं न घर्षयंति? यत् सांप्रतं तासां वलयशब्दो न श्रूयते. तदा मंत्रिणो नृपाय वलयोत्तारणस्वरूपं जगुः. तत् श्रुत्वा संजातवैराग्यो राजा दध्यौ, अहो! भूरिसंयोगः संसारे दुःखायैव भवति, यथा भूरिभिः कंकणशब्दैर्दुःखमभूत्, न तथा स्तोकैरेव तैः, एवमेकत्वे महत्सुखं, यतः—कंकणैर्भूरिभिर्दुःखं। स्वल्पैः स्वल्पतरैः सुखं॥ यादवस्यैव दृष्टांता—देकाकित्वे महासुखं॥ १॥ यथा यथा महत्तंत्रं। विस्तरश्च यथा यथा॥ तथा तथा महद्दुःखं। सुखं नैव तथा तथा॥ २॥ क्लेशाय विस्तराः सर्वे। संक्षेपास्तु सुखावहाः॥ परार्थं विस्तराः सर्वे। त्यागमात्महितं विदुः॥ ३॥ अथ यदायं मदीयो दाहज्वरः प्रशमं यास्यति, तदा मयावश्यं दीक्षा ग्राह्या. इति ध्यात्वा यावत्स नमिनृपः सुप्तस्तावत्तस्य दाहज्वरः प्रशशाम. अथ प्रातर्वाद्यनादैर्जागरितो भूपो दध्यौ, अहो! अद्य मया

स्वप्ने शैलराजोपम ऐरावणकुंभी दृष्टः, स च मदीयं रोगं दूरीचकार. यतः—देवता यतयो गावः। पितरो लिंगिनो नृपाः ॥ यद्वदंति नरं स्वप्ने। तत्तथैव भविष्यति ॥ १ ॥ एवं तं ऐरावणं पुनः पुनर्ध्यायतोऽस्य नमिमुनेर्जातिस्मृतिरभूत्, यथा पूर्वभवे मया श्रामण्यं पालितं, ततः पंचत्वं प्राप्य प्राणते देवलोकेऽहं सुरोऽभवं. ततः स नमिः स्वं पुत्रं राज्येऽभिषिच्य शासनदेवतादत्तरजोहरणः संयमं प्रतिपन्नवान्. तदा शक्रो द्विजवेषमादाय तं परीक्षितुमाययौ. स द्विजस्तं नमिराजर्षिंप्रत्यवदत्, भो राजंस्त्वया सांतःपुरं राज्यं तृणवत् त्यक्त्वा यत्संयमो गृहीतस्तन्न सुंदरं कृतं, त्वया जीवदयापालनायैव दीक्षा गृहीतास्ति, परं त्वद्व्रतग्रहणत एतास्तेंतःपुरस्त्रियो विलापान् कुर्वंति, अतस्तवेदं संयमग्रहणं निष्फलमेव. तत् श्रुत्वा नमिराजर्षिरुवाच, भो द्विज! मम व्रतग्रहणं तासां दुःखकारणं न, किंतु लोके स्वस्वार्थहानिरेव दुःखस्य कारणं, ततोऽहमपि स्वार्थमेव साधयामि, परजल्पनेन किं? द्विज आह, भो राजर्षे! अधुना ते गृहाणि अंतःपुराणि च ज्वलमानानि संति, त्वं तानि किमुपेक्षसे? उपेक्षया च लोके तवापवादो भवति, यत आश्रितस्योपेक्षणं पापं, त्वं तु चतुरोऽसि, अतो विचारय?

नमिराह भो द्विज! अथैतानि गृहाणि अंतःपुराणि च मदीयानि न संति. पुनराह द्विजः पुर्यां। प्राकारमति दुर्गमं ॥ नानायंत्रयुतं राजन्। कारयित्वा परिव्रजेः ॥ १ ॥ राजर्षिः प्राह भो भद्र। संयमो नगरं मम ॥ शमाख्यो विहितस्तत्र। प्राकारो नययंत्रवान् ॥ २ ॥ द्विजोऽवोचन्निवासाय। लोकानां सुमनोहरान् ॥ प्रासादान् कारयित्वा भोः। क्षत्रिय प्रव्रजेस्ततः ॥ ३ ॥ मुनिः प्रोचे कुधीरेव। कुर्यात् पथि वहन् गृहं ॥ निश्चलं यत्र संस्थानं। युक्तं तत्रैव मंदिरं ॥ ४ ॥ द्विजः प्राह निग्रह्यादौ। चौरान् सुस्थं पुरं कुरु ॥ स आह चौरा रागाद्या। निग्रहीताश्च ते मया ॥ ५ ॥ द्विजः प्राह च राजर्षे। नमंति न तवोद्धताः ॥ पार्थिवास्तान् विनिर्जित्य। प्रव्रज्याग्रहणं कुरु ॥ ६ ॥ स आह भूरिशो वीरा। मुधा पूर्वं जिता मया ॥ यद्यात्मानं जयाम्येक। मेष मे परमो जयः ॥ ७ ॥ इत्याद्युत्तरप्रत्युत्तरपरंपरा विशेषतः श्रीउत्तराध्ययनसूत्रतो ज्ञेया. इत्यादिविप्रोक्तसर्ववचनान्यवगणय्य यावत् स नमिराजर्षिर्निश्चलमना अग्रतोऽचालीत्तावत् स्वरूपस्थ इंद्रो नमिंप्रति प्राह, भो राजर्षे! नूनं त्वं धन्यः कृतार्थश्चासि, त्वया सर्वेऽपि भावारयो जिताः, जगति च प्रशंसापात्रमसि, तस्येत्यादिस्तुतिं कृत्वा शक्रस्तं भावतो

नमस्कृत्य स्वर्गं जगाम. क्रमेण स नमिराजर्षिरपि तीव्रं तपस्तप्त्वा क्षीणसर्वकर्मा केवलज्ञानयुतो मुक्तिं ययौ. अथ सा मदनरेखा साध्व्यपि संयतिनीपार्श्वे स्थिता तीव्रं तपस्तपस्यंती सर्वकर्मक्षयात् केवलज्ञानमवाप्य मुक्तिं ययौ.



॥ इति श्रीमदनरेखाचरित्रं समाप्तं ॥ श्रीरस्तु ॥

आ ग्रंथनी बीजो आवृत्ति जामनगरनिवासी पंडित श्रावक हीरालाल हंसराजे स्वपरना श्रेयमाटे श्रीशुभशीलगणीजीए रचेला कथाकोषमांथी उद्धरीने तेनी मूलभाषामां बनाता प्रयासे सुधारो वधारो करीने पोताना श्री जैनभास्करोदयप्रेसमां छापी प्रसिद्ध कर्यो छे. ॥

॥ समाप्तोऽयं ग्रंथो गुरुश्रीमच्चारित्रविजयसुप्रसादात् ॥ श्रीरस्तु ॥